ग्रं.नं.९८

2454

वेदांत

संस्कृत

भगवद्गीता

८ गीता

848/22

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.
" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

ने

अंगुष्ठाभ्यांनमः॥नचैनंक्लेदयंत्यापोनशोषयतिमारुतः॥इति
तर्जनीभ्यांनमः॥अछेद्योयमदाह्योयमक्लेद्योशो… एवच
॥इतिमध्यमाभ्यांनमः॥नित्यःसर्वगतःस्थाणुरचलोयम
सनातनः॥इतिअनामिकाभ्यांनमः॥पश्यमेपार्थरूपाणि
शतशोथसहस्रशः॥इतिकनिष्ठिकाभ्यांनमः॥नानावि
धानिदिव्यानिनानावर्णाकृतीनिच॥इतिकरतलकरपृष्ठा
भ्यांनमः॥श्रीमत्तानात्मनेकृष्णायहृदयायनमः॥श्रीम
दैश्वर्यात्मनेकृष्णायशिरसेस्वाहा॥श्रीमच्छक्त्यात्मनेकृ

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

गी० २

णायशिखायैवौषट्॥श्री[illegible]शिखायैवौष

ट्॥श्रीमत्तेजसात्मनेकृष्णायनेत्रत्रयायवौषट्॥श्रीमद्

ब्रात्मनेबलभद्रायपरमायकवचायहुं॥श्रीमत्सर्वात्मि

नेकृष्णायपरमास्त्रायफट्॥श्रीकृष्णप्रसादसिद्ध्यर्थंगीतामा

लामंत्रजपेविनियोगः॥अथध्यानं॥पार्थायप्रतिबोधिता

भगवतानारायणेनस्वयंव्यासेनग्रथितापुराणमुनिनाम

ध्येमहाभारते॥अद्वैतामृतवर्षिणींभगवतीमष्टादशाध्या

यिनीमंबत्वामनुसंदधामि भगवद्गीतेभवद्वेषिणीं॥१॥नमो

(2A)

कृतेव्यासविशालबुद्धेफुल्लारविंदायतपत्रनेत्र॥येनत्वयाभा
रततैलपूर्णःप्रज्वालितोज्ञानमयःप्रदीपः॥२॥प्रपन्नपारिजा
तायतोत्रवेत्रैकपाणये॥ज्ञानमुद्रायकृष्णायगीतामृतदुहे
नमः॥३॥सर्वोपनिषदोगावोदोग्धागोपालनंदनः॥पार्थोवत्स
सुधिर्भोक्तादुग्धंगीतामृतंमहत्॥४॥वसुदेवसुतंदेवंकंसचा
णूरमर्दनं॥देवकीपरमानंदंकृष्णंवंदेजगद्गुरुं॥५॥सारथ्य
मर्जुनस्याजौकुर्वन्गीतामृतंददौ॥लोकत्रयोपकारायतस्मै
कृष्णात्मनेनमः॥६॥भीष्मद्रोणतटाजयद्रथजलागांधा

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan

(3)

गी०

रनीलोत्पलाशल्यग्राहवतिकृपेणवहिनिकर्णेनवेलाकु
ला॥अश्वत्थामविकर्णघोरमकरादुर्योधनावर्तिनिसोत्ती
र्णाखलुपांडवैरणनदीकैवर्तकःकेशवः॥३॥पाराशर्यव
चःसरोजममलंगीतार्थगंधोत्कटंनानाख्यानककेसरंहरि
कथासंबोधनाबोधितंलोकेसज्जनषट्पदैरहरहःपेपी
यमानंमुदाभूयाद्भारतपंकजंकलिमलप्रध्वंसिनःश्रेयसे
॥४॥मूकंकरोतिवाचालंपंगुंलंघयतेगिरिं॥यत्कृपा
तमहंवंदेपरमानंदमाधवं॥५॥यंब्रह्मावरुणेंद्रमरुत रुद्र

रुद्र

(3A)

ःस्तुन्वंतिदिव्यैःस्तवैर्वेदैःसांगपदक्रमोपनिषदैर्गायंतियं
सामगाः॥ध्यानावस्थिततद्गतेनमनसापश्यंतियंयोगिनो
यस्यांतंनविदुःसुरासुरगणादेवायतस्मैनमः॥१०॥अथ।
गीतालिख्यते॥धृतराष्ट्रउवाच॥धर्मक्षेत्रेकुरुक्षेत्रेसमवे
तायुयुत्सवः॥मामकाःपांडवाश्चैवकिमकुर्वतसंजय॥१॥
संजयउवाच॥दृष्ट्वातुपांडवानीकंव्यूढंदुर्योधनस्तदा॥आ
चार्यमुपसंगम्यराजावचनमब्रवीत्॥२॥पश्यैतांपांडुपु।
त्राणामाचार्यमहतींचमूं॥व्यूढांद्रुपदपुत्रेणतवशिष्ये

गी० णधीमता॥३॥अत्रशूरामहेष्वासाभीमार्जुनसमायुधि॥यु
४ युधानोविराटश्चद्रुपदश्चमहारथः॥४॥धृष्टकेतुश्चेकिता
(5) नःकाशीराजश्चवीर्यवान्॥पुरुजित्कुंतिभोजश्चशैब्यश्चन
रपुंगवः॥५॥युधामन्युश्चविक्रांतउत्तमौजाश्चवीर्यवान्
॥सौभद्रोद्रौपदेयाश्चसर्वएवमहारथाः॥६॥अस्माकंतुवि
शिष्टायेतान्निबोधद्विजोत्तम॥नायकाममसैन्यस्यसंज्ञार्थं
तान्ब्रवीमिते॥७॥भवान्भीष्मश्चकर्णश्चकृपश्चसमितिंज
यः॥अश्वत्थामाविकर्णश्चसौमदत्तिस्तथैवच॥८॥अन्येच ४

(5A)

बहवःश्शूरामदर्थेत्यक्तजीविताः॥नानाशस्त्रप्रहरणाःसर्वे
युद्धविशारदाः॥९॥अपर्याप्तंतदस्माकंबलंभीष्माभिर
क्षितं॥पर्याप्तंत्विदमेतेषांबलंभीमाभिरक्षितं॥१०॥अय
नेषुचसर्वेषुयथाभागमवस्थिताः॥भीष्ममेवाभिरक्षंतु।
भवंतःसर्वएवहि॥११॥तस्यसंजनयन्हर्षंकुरुवृद्धःपितामः
हः॥सिंहनादंविनद्योच्चैःशंखंदध्मौप्रतापवान्॥१२॥ततः
शंखाश्चभेर्यश्चपणवानकगोमुखाः॥सहसैवाभ्यहन्यंत
सशब्दस्तुमुलोभवत्॥१३॥ततःश्वेतैर्हयैर्युक्तेमहतिस्यं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5)

गी०

द्नेस्थितौ॥माधवःपांडवश्चैवदिव्यौशंखौप्रदध्मतुः॥१४॥
पांचजन्यंहृषिकेशोदेवदत्तंधनंजयः॥पौंड्रंदध्मौमहाशंखं
भीमकर्मावृकोदरः॥१५॥अनंतविजयंराजाकुंतीपुत्रोयु
धिष्ठिरः॥नकुलःसहदेवश्चसुघोषमणिपुष्पकौ॥१६॥
काश्यश्चपरमेष्वासःशिखंडीचमहारथः॥धृष्टद्युम्नोवि
राटश्चसात्यकिश्चापराजितः॥१७॥द्रुपदोद्रौपदेयाश्चस
र्वशःपृथिवीपते॥सौभद्रश्चमहाबाहुःशंखान्दध्मुःपृथ
क्पृथक्॥१८॥सघोषोधार्त्तराष्ट्राणांहृदयानिव्यदारय

(5A)

त॥नभश्चपृथिवींचैवतुमुलोव्यनुनादयन्॥१९॥अथव्य
वस्थितान्दृष्ट्वाधार्तराष्ट्रान्कपिध्वजः॥प्रवृत्तेशस्त्रसंपाते
धनुरुद्यम्यपांडवः॥२०॥हृषीकेशंतदावाक्यमिदमाहम
हीपते॥सेनयोरुभयोर्मध्येरथंस्थापयमेच्युत॥२१॥या
वदेतान्निरीक्षेहंयोद्धुकामानवस्थितान्॥कैर्मयासहयो
द्धव्यमस्मिन्रणसमुद्यमे॥२२॥योत्स्यमानानवेक्षेहंय
एतेत्रसमागताः॥धार्तराष्ट्रस्यदुर्बुद्धेर्युद्धेप्रि
यचिकीर्षवः॥२३॥संजयउवाच॥एवमुक्तोहृषीकेशो

Rajwade Sanshodhan Mandal, Dhule and the ... project

(6)

गी०
६

गुडाकेशेनभारत॥सेनयोरुभयोर्मध्येस्थापयित्वारथो
त्तमं॥२४॥भीष्मद्रोणप्रमुखतःसर्वेषांचमहीक्षितां॥उ
वाचपार्थपश्यैतान्समवेतान्कुरूनिति॥२५॥तत्रापश्य
त्स्थितान्पार्थःपितॄनथपितामहान्॥आचार्यान्मातुला
न्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा॥२६॥श्वशुरान्सुहृदश्चैव
सेनयोरुभयोरपि॥तान्समीक्ष्यसकौंतेयःसर्वान्बंधूनव
स्थितान्॥२७॥कृपयापरयाविष्टोविषीदन्निदमब्रवीत्॥अ
र्जुनउवाच॥दृष्ट्वेमंस्वजनंकृष्णयुयुत्सुंसमुपस्थितं॥२८॥सी

(6A)

दंतिममगात्राणिमुखंचपरिशुष्यति॥वेपथुश्चशरीरेमेरोम
हर्षश्चजायते॥२९॥गांडीवंस्रंसतेहस्तात्वक्चैवपरिदह्य
ते॥नचशक्नोम्यवस्थातुंभ्रमतीवचमेमनः॥३०॥निमित्ता
निचपश्यामिविपरीतानिकेशव॥नचश्रेयोनुपश्यामि
हत्वास्वजनमाहवे॥३१॥नकांक्षेविजयंकृष्णनचराज्यंसु
खानिच॥किंनोराज्येनगोविंदकिंभोगैर्जीवितेनवा॥३२॥
येषामर्थेकांक्षितंनोराज्यंभोगाःसुखानिच॥तइमेवस्थि
तायुद्धेप्राणांस्त्यक्त्वाधनानिच॥३३॥आचार्याःपितरःपु

गी० आस्तथैवचपितामहाः॥मातुलाःश्वशुराःपौत्राःश्यालाःसं
बंधिनस्तथा॥३४॥एतान्नहंतुमिच्छामिघ्नतोपिमधुसूदन॥अ
(७) पित्रैलोक्यराज्यस्यहेतोःकिंनुमहीकृते॥३५॥निहत्यधार्त्त
राष्ट्रान्नःकाप्रीतिःस्याज्जनार्दन॥पापमेवाश्रयेदस्मान्हत्वै
तानाततायिनः॥३६॥तस्मान्नार्हावयंहंतुंधार्त्तराष्ट्रान्स्वबांध
वान्॥स्वजनंहिकथंहत्वासुखिनःस्याममाधव॥३७॥यद्यप्ये
तेनपश्यंतिलोभोपहतचेतसः॥कुलक्षयकृतंदोषंमित्र
द्रोहेचपातकं॥३८॥कथंनज्ञेयमस्माभिःपापादस्मान्निव

the Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai. Joint project

(7-A)

न्निवर्त्तितुं॥ कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन॥३९॥ कु
लक्षये प्रणश्यंति कुलधर्माः सनातनाः॥ धर्मे नष्टे कुलं
कृत्स्नमधर्मोभिभवत्युत॥४०॥ अधर्माभिभवात्कृष्ण
प्रदुष्यंति कुलस्त्रियः॥ स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसं
करः॥४१॥ संकरो नरकायैव कुलघ्नानां कुलस्य च॥ पतंति
पितरो ह्येषां लुप्तपिंडोदकक्रियाः॥४२॥ दोषैरेतैः कुलघ्ना
नां वर्णसंकरकारकैः॥ उत्साद्यंते जातिधर्माः कुलधर्मा
श्च शाश्वताः॥४३॥ उत्सन्नकुलधर्माणां मनुष्याणां ज

नार्द्दन॥ नरकेनियतंवासोभवतीत्यनुशुश्रुम॥४४॥ अ
होबतमहत्पापंकर्तुंव्यवसितावयं॥ यद्राज्यसुखलोभेनहं
तुंस्वजनमुद्यताः॥४५॥ यदिमामप्रतीकारमशस्त्रंशस्त्रपा
णयः॥ धार्त्तराष्ट्रारणेहन्युस्तन्मेक्षेमतरंभवेत्॥४६॥ संज
यउवाच॥ एवमुक्त्वार्जुनःसंख्येरथोपस्थउपाविशत्॥ वि
सृज्यसशरंचापंशोकसंविग्नमानसः॥४७॥ हरिःॐतत्सदि
तिश्रीमन्महाभारतेशतसहस्रसंहितायांवैयासिक्यांभी
ष्मपर्वणिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोग

(8A)

शास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादयोगो नाम प्रथ
मोध्यायः ॥१॥ श्रीकृष्णाय नमः ॥ संजय उवाच ॥ तं तथा
कृपयाविष्टमश्रुपूर्णाकुलेक्षणं ॥ विषीदंतमिदं वाक्यमु
वाच मधुसूदनः ॥१॥ श्रीभगवानुवाच ॥ कुतस्त्वा कश्म
लमिदं विषमे समुपस्थितं ॥ अनार्यजुष्टमस्वर्ग्यमकी
र्तिकरमर्जुन ॥२॥ क्लैब्यं मास्मगमः पार्थ नैतत्त्वय्युपप
द्यते ॥ क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ॥३॥ अर्जु
न उवाच ॥ कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ॥ इषु

Joint project of the Rajawade Sanshodhan Mandal ... and the Yashwantrao Chavan Pratishthan Mumbai

भिःप्रतियोत्स्यामिपूजार्हावरिसूदन॥४॥गुरूनहत्वाहिमहानु
भावान्श्रेयोभोक्तुंभैक्ष्यमपीहलोके॥हत्वार्थकामांस्तुगु
रूनिहैवभुंजीयभोगान्रुधिरप्रदिग्धान्॥५॥नचैतद्विद्मःक
तरन्नोगरीयोयद्वाजयेमयदिवानोजयेयुः॥यानेवहत्वा
नजिजीविषामस्तेवस्थिताःप्रमुखेधार्तराष्ट्राः॥६॥कार्पण्य
दोषोपहतःस्वभावःपृच्छामित्वांधर्मसंमूढचेताः॥यच्छ्रेय
स्यान्निश्चितंब्रूहितन्मेशिष्यस्तेहंशाधिमांत्वांप्रपन्नं॥७॥
नहिप्रपश्यामिममापनुद्याद्यच्छोकमुच्छोषणमिंद्रियाणां

(9A)

॥आवाप्यभूमावसपत्नमृद्धंराज्यंसुराणामपिचाधिपत्यं
॥८॥संजयउवाच॥एवमुक्त्वाहृषीकेशंगुडाकेशःपरंत
प॥नयोत्स्यइतिगोविंदमुक्त्वातूष्णींबभूवह॥९॥तमुवा
चहृषिकेशःप्रहसन्निवभारत॥सेनयोरुभयोर्मध्येवि
षीदंतमिदंवचः॥१०॥श्रीभगवानुवाच॥अशोच्यानन्व
शोचस्त्वंप्रज्ञावादांश्चभाषसे॥गतासूनगतासूंश्चना
नुशोचंतिपंडिताः॥११॥नत्वेवाहंजातुनासंनत्वंनेमेज
नाधिपाः॥नचैवनभविष्यामःसर्वेवयमतःपरं॥१२॥दे

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

गी० हिनोस्मिन्यथादेहेकौमारंयौवनंजरा ॥ तथादेहांतरप्राप्ति

१० र्धीरस्तत्रनमुह्यति ॥१३॥ मात्रास्पर्शास्तुकौंतेयशीतोष्णसु

(10) खदुःखदाः ॥ आगमापायिनोनित्यास्तांतितिक्षस्वभारत ॥१४॥ स्ति

यंहिनव्यथयंत्येतेपुरुषंपुरुषर्षभ ॥ समदुःखसुखंधी

रंसोमृतत्वायकल्पते ॥१५॥ नासतोविद्यतेभावोनाभावो

विद्यतेसतः ॥ उभयोरपिदृष्टोंतस्त्वनयोस्तत्वदर्शिभिः ॥१६॥

॥ अविनाशितुतद्विद्धियेनसर्वमिदंततं ॥ विनाशमव्ययस्या १०

स्यास्यनकश्चित्कर्तुमर्हति ॥१७॥ अंतवंतइमेदेहानित्य

रिते ७

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(10A)

स्योक्ताःशरीरिणः॥अनाशिनोप्रमेयस्यतस्माद्युध्यस्वभार
त॥१८॥यएनंवेत्तिहंतारंयश्चैनंमन्यतेहतं॥उभौतौनविजा
नीतोनायंहंतिनहन्यते॥१९॥नजायतेम्रियतेवाकदाचि
न्नायंभूत्वाभवितावानभूयः॥अजोनित्यःशाश्वतोयंपु
राणोनहन्यतेहन्यमानेशरीरे॥२०॥वेदाविनाशिनंनित्यंयए
नंमजमव्ययं॥कथंसपुरुषःपार्थकंघातयतिहंतिकं
॥२१॥वासांसिजीर्णानियथाविहायनवानिगृह्णाति
नरोपराणि॥तथाशरीराणिविहायजीर्णान्यन्यानि
सं

...Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com